हेमपर्व्वतः, पुं (हेममयः पर्व्वतः ।) सुमेरुगिरिः । इति हलायुधः ॥
हेमपुष्पं क्ली, (हेमवर्णं पुष्पम् ।) अशोकपुष्पम् । जवापुष्पम् । इति मेदिनी ॥
हेमपुष्पः, पुं, (हेमवर्णं पुष्पं यस्य ।) चम्पकवृक्षः । इति शब्दचन्द्रिका ॥ (अस्य पर्य्यायो यथा,—
"चाम्पेयश्चम्पकः प्रोक्तो हेमपुष्पश्च स स्मृतः ॥"
अशोकः । अस्य पर्य्यायो यथा,—
अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः ।
कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
हेमपुष्पकः, पुं, (हेमवर्णं पुष्पं यस्य । कप् ।) चम्पकवृक्षः । इत्यमरः । २ । ४ । ६३ ॥ लोध्रः । इति राजनिर्घण्टः ॥
हेमपुष्पिका, स्त्री, हेमवर्णं पुष्पं यस्याः । कन् + टाप् । अत इत्वम् ।) स्वर्णयूथिका । इत्यमरः । २ । ४ । ७१ ॥ (तथास्याः पर्य्यायः ।
"यूथिका गणिकाम्बष्ठा सा पीता हेमपुष्पिका ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
हेमपुष्पी, स्त्री, (हेमवर्णं पुष्पमस्याः । गौरादित्वात् ङीष् ।) मञ्जिष्ठा । इति शब्दमाला ॥ स्वर्णजीवन्ती । इन्द्रवारुणी । स्वर्णुली । मुषली । कण्टकारी । इति राजनिर्घण्टः ॥
हेमफला, स्त्री, हेमवर्णानि फलान्यस्याः ।) स्वर्णकदली । इति राजनिर्घण्टः ॥
हेममाला, स्त्री, यमपत्नी । इति केचित् । हेमनिर्म्मिता माला ।) स्वर्णस्रक् ॥
हेममाली, [न्] पुं, (हेमेव किरणानां मालास्त्यस्य । इनिः ।) सूर्य्यः । यथा भविष्ये ।
"या शुक्ला कुरुशार्दूल ! वैशाखे मासि वै तिथिः ।
तृतीया साक्षया लोके गीर्व्वाणैरभिवन्दिता ॥
योऽस्यां ददाति करकान् वारिवाजसमन्वितान् ।
स याति पुरुषो वीर ! लोकान् वै हेममालिनः ॥"
हेममालिनः सूर्य्यस्य । इति तिथ्यादितत्त्वम् ॥ (स्वर्णमालाविशिष्टे, त्रि ॥)
हेमयूथिका, स्त्री, (हेमवर्णा यूथिका ।) स्वर्णयूथिका । इति राजनिर्घण्टः ॥
हेमरागिणी, स्त्री, (हेम इव रागोऽस्या अस्तीति । इनिः । ङीप् ।) हरिद्रा । इति त्रिकाण्डशेषः ॥
हेमलः, पुं, (हेम तदंशं लाति गृह्णातीति । ला + कः ।) स्वर्णकारः । कृकलासः । प्रस्तरभेदः । स तु कषपाषाणः । इति मेदिनी ॥
हेमलता, स्त्री, (हेमवर्णा लता ।) स्वर्णजीवन्ती । इति राजनिर्घण्टः ॥ (स्वर्णजीवन्तीशब्देऽस्या विषयो ज्ञातव्यः ॥)
हेमवलं, क्ली, (हेम्ना वलते शोभते इति । वल + अच् ।) मौक्तिकम् । इति राजनिर्घण्टः ॥ हिमवलमिति साधुपाठः ॥

हेमशङ्खः, पुं, (हेमवर्णः शङ्खोऽस्य ।) विष्णुः । इति त्रिकाण्डशेषः ॥
हेमशिखा, स्त्री, (हेमवर्णा शिखास्याः ।) स्वर्णक्षीरी । इति शब्दरत्नावली ॥
हेमसारं, क्ली, (हेम सारयति निर्म्मलीकरोतीति । सृ + णिच् + अण् ।) तुत्थम् । यथा—
"तुत्थके तु शिखिग्रीवं हेमसारं मयूरकम् ।"
इति रसचन्द्रिका ॥
हेमसूत्रकं, क्ली, (हेम्नः सूत्रमत्र । कप् ।) हारविशेषः । इति धरणिः ॥
हेमहस्तिरथः, पुं, (हेमनिर्म्मितहस्तिविशिष्टो रथो यत्र । स तु दानार्थं कल्पितः ।) महादानविशेषः । तद्विवरणं यथा,—
"अथातः संप्रवक्ष्यामि हेमहस्तिरथं शुभम् ।
यस्य प्रदानात् भवनं वैष्णवं याति मानवः ॥
पुण्यां तिथिं समासाद्य तुलापुरुषदानवत् ।
विप्रवाचनकं कुर्य्यात् लोकेशावाहनं बुधः ॥
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम् ।
अत्राप्युपोषितस्तद्वत् ब्राह्मणैः सह भोजनम् ॥
कुर्य्यात् पुष्परथाकारं काञ्चनं मणिमण्डितम् ।
वलभीभिर्व्विचित्राभिश्चतुश्चक्रसमन्वितम् ॥
लोकपालाष्टकोपेतं ब्रह्मार्कशिवसंयुतम् ।
मध्ये नारायणोपेतं लक्ष्म्या चैव समन्वितम् ॥
कृष्णाजिनतिलद्रोणं कृत्वा संस्थापयेद्रथम् ।
तथाष्टादश धान्यानि भाजनासनचन्दनैः ॥
दीपकोपानहच्छत्रदर्पणं पादुकान्वितम् ।
ध्वजे तु गरुडं कुर्य्यात् कूबराग्रे विनायकम् ॥
नानाफलसमायुक्तमुपरिष्टाद्वितानकम् ।
कौषेयपञ्चवस्त्रञ्च अम्लानकुसुमान्वितम् ॥
चतुर्भिः कलसैः सार्द्धं गोभिरष्टाभिरन्वितम् ।
चतुर्भिर्हेममातङ्गैर्मुक्तादामविभूषितम् ॥
स्वरूपतः करिभ्यान्तु युक्तं कृत्वा निवेदयेत् ।
कुर्य्यात् पञ्चपलादूर्द्ध्वमभावादपि शक्तितः ॥
ततो मङ्गलशब्देन स्नापितो वेदपुङ्गवैः ।
त्रिः प्रदक्षिणमावृत्य गृहीतकुसुमाञ्जलिः ॥
इममुच्चारयन्मन्त्रं ब्राह्मणेभ्यो निवेदयेत् ॥
नमो नमः शङ्करपद्मजार्क-
लोकेशविद्याधरवासुदेवैः ।
त्वं मन्यसे वेद पुराण यज्ञ
तेजोमयस्यन्दन पाहि तस्मात् ॥
यत्तत् पदं परमगुह्यतमं सुरारे-
रानन्दहेतु गुणरूपविमुक्तमन्तः ।
योगैकमानसदृशो मुनयः समाधौ
पश्यन्ति तत्त्वमसि नाथ रथेऽधिरूढः ॥
यस्मात्त्वमेव भवसागरसंप्लुताना-
मानन्दभाण्डभृतमध्वरपानपात्रम् ।
तस्मादघौघशमनेन कुरु प्रसादं
चामीकरेभरथमाधवसंप्रदानात् ॥
इत्थं प्रणम्य कनकेभरथप्रदानं
यः कारयेत् सकलपापविमुक्तदेहः ।

विद्याधरामरमुनीन्द्रगणाभिजुष्टं
प्राप्नोत्यसौ पदमतीन्द्रियमिन्दुमौलेः ॥
कृतदुरितवितानादुग्रसद्वह्निजाल-
व्यतिकरकृतदाहोद्वेगभाजोऽपि बन्धून् ।
नयति च पितृपुत्रान् बान्धवानप्यशेषान्
कृतगजरथदान शाश्वतं सद्म विष्णोः ॥"
इति मत्स्यपुराणे महादानानुकीर्त्तने हेमहस्तिरथप्रदानिको नाम २८२ अध्यायः ॥
हेमा, [न्] पुं, बुधग्रहः । इति त्रिकाण्डशेषः ॥
हेमा, स्त्री, (हेम हेमवर्णमस्त्यस्या इति अच् । टाप् ।) अप्सरः । सुन्दरी स्त्री । इति केचित् ॥
हेमाङ्गः, पुं, (हेमेव पीतवर्णमङ्गं यस्य ।) गरुडः । सिंहः । सुमेरुः । ब्रह्मा । इति मेदिनी ॥ चम्पकवृक्षः । इति शब्दरत्नावली ॥ विष्णुः । इति तस्य सहस्रनामस्तोत्रम् ॥ हेमवर्णशरीरे, क्ली । तद्युक्ते, त्रि ॥
हेमाद्रिः, पुं, (हेममयोऽद्रिः ।) सुमेरुपर्व्वतः । इत्यमरः । १ । १ । ५२ ॥ यादवराजविशेषः ॥ स च चिन्तामणिकामधेनुकल्पद्रुमनामकस्मृतिसंग्रहकारकः । यथा,—
"तस्यास्ति नाम हेमाद्रिः सर्व्वश्रीकरणप्रभुः ।
निजोदारतया यस्य सर्व्वश्रीकरणप्रभुः ॥
अनेन चिन्तामणिकामधेनु-
कल्पद्रुमानर्थिजनाय दत्तान् ।
विलोक्य शङ्के किममुष्य सर्व्व-
गीर्व्वाणनाथोऽपि करप्रदोऽभूत् ॥
अथामुना धर्म्मकथादरिद्रं
त्रैलोक्यमालोक्य कलेर्व्वलेन ।
तस्योपकारं दधतानुचिन्त्य
चिन्तामणिः प्रादुरकारि चारुः ॥
पञ्चखण्डात्मके शास्त्रे व्रतखण्डादनन्तरम् ।
दानखण्डमिदं तत्र द्वितीयमथ कथ्यते ॥"
इति तत्कृतचतुर्व्वर्गचिन्तामणौ दानखण्डीयश्लोकाः ॥
हेमाद्रिजरणः, पुं, (हेमाद्रौ जीर्य्यतीति । जॄ + ल्युः ।) स्वर्णक्षीरी । इति रत्नमाला ॥ (अस्य पर्य्यायविवरणादिकं स्वर्णक्षीरीशब्दे ज्ञातव्यम् ॥)
हेमाह्वः, पुं, (हेम हेमवर्णमाह्वयते स्वर्णेन स्पर्द्धते इति । आ + ह्वे + कः ।) वनचम्पकः । इति राजनिर्घण्टः ॥ (हेम्न आह्वा आह्वा यस्य ।) धुस्तूरः । कनकाह्वयशब्ददर्शनात् ॥
हेमाह्वा, स्त्री, (हेम्न आह्वा आह्वा आख्या यस्याः ।) स्वर्णजीवन्ती । इति राजनिर्घण्टः ॥
हेम्ना, पुं, बुधग्रहः । यथा,—
"हेलिः सूर्य्यश्चन्द्रमाः शीतरश्मि-
र्हेम्ना विज्ञो बोधनश्चेन्दुपुत्रः ।"
इति ज्योतिस्तत्त्वम् ॥
हेयः, त्रि, (हा + "अचो यत् ।" ३ । १ । ९७ इति यत् । "ईद्यति ।" ६ । ४ । ६५ । इति